# अथ चतुर्विंशोऽध्यायः

—:०:—

ऋषिः—प्रजापतिः। देवता—प्रजापतिः। छन्दः—भुरिक्संकृतिः। स्वरः—गान्धारः।

अश्वस्तूपरो गोमृगस्ते प्राजापत्याः कृष्णग्रीवऽआग्नेयो रराटे पुरस्तात् सारस्वती मेष्युधस्ताद्धन्वोराश्विनावधोरामौ बाह्वोः सौमापौष्णः श्यामो नाभ्याᳬसौर्ययामौ श्वेतश्च कृष्णश्च पार्श्वयोस्त्वाष्ट्रौ लोमशसक्थौ सक्थ्योर्वायव्यः श्वेतः पुच्छऽइन्द्राय स्वपस्याय वेहद्वैष्णवो वामनः॥१॥

ऋषिः—प्रजापतिः। देवता—सोमादयः। छन्दः—निचृत्संकृतिः। स्वरः—गान्धारः।

रोहितो धूम्ररोहितः कर्कन्धुरोहितस्ते सौम्या बभ्रुररुणबभ्रुः शुकबभ्रुस्ते वारुणाः शितिरन्ध्रोऽन्यतः शितिरन्ध्रः समन्तशितिरन्ध्रस्ते सावित्राः शितिबाहुरन्यतःशितिबाहुः समन्तशितिबाहुस्ते बार्हस्पत्याः पृषती क्षुद्रपृषती स्थूलपृषती ता मैत्रावरुण्यः॥२॥

ऋषिः—प्रजापतिः। देवता—अश्व्यादयः। छन्दः—निचृदतिजगती। स्वरः—निषादः।

शुद्धवालः सर्वशुद्धवालो मणिवालस्तऽआश्विनाः श्येतः श्येताक्षोऽरुणस्ते रुद्राय पशुपतये कर्णा यामाऽअवलिप्ता रौद्रा नभोरूपाः पार्जन्याः॥३॥

ऋषिः—प्रजापतिः। देवता—मारुतादयः। छन्दः—विराडतिधृतिः। स्वरः—षड्जः।

पृश्निस्तिरश्चीनपृश्निरूर्ध्वपृश्निस्ते मारुताः फल्गूर्लोहितोर्णी पलक्षी ताः सारस्वत्यः प्लीहाकर्णः शुण्ठाकर्णोऽध्यालोहकर्णस्ते त्वाष्ट्राः कृष्णग्रीवः शितिकक्षोऽञ्जिसक्थस्तऽऐन्द्राग्नाः कृष्णाञ्जिरल्पाञ्जिर्महाञ्जिस्तऽउषस्याः॥४॥

ऋषिः—प्रजापतिः। देवता—विश्वेदेवाः। छन्दः—निचृद्बृहती। स्वरः—मध्यमः।

शिल्पा वैश्वदेव्यो रोहिण्यस्त्र्यवयो वाचेऽविज्ञाताऽअदित्यै सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः॥५॥

ऋषिः—प्रजापतिः। देवता—अग्न्यादयः। छन्दः—विराडुष्णिक्। स्वरः—ऋषभः।

कृष्णग्रीवाऽआग्नेयाः शितिभ्रवो वसूनाᳬरोहिता रुद्राणाᳬश्वेताऽअवरोकिणऽआदित्यानां नभोरूपाः पार्जन्याः॥६॥

ऋषिः—प्रजापतिः। देवता—इन्द्रादयः। छन्दः—अतिजगती। स्वरः—निषादः।

उन्नतऽऋषभो वामनस्तऽऐन्द्रावैष्णवाऽउन्नतः शितिबाहुः शितिपृष्ठस्तऽऐन्द्राबार्हस्पत्याः शुकरूपा वाजिनाः कल्माषाऽआग्निमारुताः श्यामाः पौष्णाः॥७॥

ऋषिः—प्रजापतिः। देवता—इन्द्राग्न्यादयः। छन्दः—विराड्बृहती। स्वरः—मध्यमः।

एताऽऐन्द्राग्ना द्विरूपाऽअग्नीषोमीया वामनाऽअनड्वाहऽआग्नावैष्णवा वशा मैत्रावरुण्योऽन्यतऽएन्यो मैत्र्यः॥८॥

ऋषिः—प्रजापतिः। देवता—अग्न्यादयः। छन्दः—निचृत्पङ्क्तिः। स्वरः—पञ्चमः।

कृष्णग्रीवाऽआग्नेया बभ्रवः सौम्याः श्वेता वायव्याऽअविज्ञाताऽअदित्यै सरूपा धात्रे वत्सतर्यो देवानां पत्नीभ्यः॥९॥

ऋषिः—प्रजापतिः। देवता—अन्तरिक्षादयः। छन्दः—विराड्गायत्री । स्वरः—षड्जः।

कृष्णा भौमा धूम्राऽआन्तरिक्षा बृहन्तो दिव्याः शबला वैद्युताः सिध्मास्तारकाः॥१०॥

ऋषिः—प्रजापतिः। देवता—वसन्तादयः। छन्दः—विराड्बृहती। स्वरः—मध्यमः।

धूम्रान् वसन्तायालभते श्वेतान् ग्रीष्माय कृष्णान् वर्षाभ्योऽरुणाञ्छरदे पृषतो हेमन्ताय पिशङ्गाञ्छिशिराय॥११॥

ऋषिः—प्रजापतिः। देवता—अग्न्यादयः। छन्दः—विराडनुष्टुप्। स्वरः—गान्धारः।

त्र्यवयो गायत्र्यै पञ्चावयस्त्रिष्टुभे दित्यवाहो
जगत्यै त्रिवत्साऽअनुष्टुभे तुर्यवाहऽउष्णिहे॥१२॥

ऋषिः—प्रजापतिः। देवता—विराजादयः। छन्दः—निचृदनुष्टुप्। स्वरः—गान्धारः।

पष्ठवाहो विराजऽउक्षाणो बृहत्याऽऋषभाः
ककुभेऽनड्वाहः पङ्क्त्यै धेनवोऽतिछन्दसे॥१३॥

ऋषिः—प्रजापतिः। देवता—अग्न्यादयः। छन्दः—भुरिगतिजगती। स्वरः—निषादः।

कृष्णग्रीवाऽआग्नेया बभ्रवः सौम्याऽउपध्वस्ताः सावित्रा वत्सतर्यः सारस्वत्यः श्यामाः पौष्णाः पृश्नयो मारुता बहुरूपा वैश्वदेवा वशा द्यावापृथिवीयाः॥१४॥

ऋषिः—प्रजापतिः। देवता—इन्द्रादयः। छन्दः—विराडुष्णिक्। स्वरः—ऋषभः।

उक्ताः सञ्चराऽएताऽऐन्द्राग्नाः कृष्णा वारुणाः पृश्नयो मारुताः कायास्तूपराः॥१५॥

ऋषिः—प्रजापतिः। देवता—अग्न्यादयः। छन्दः—शक्वरी। स्वरः—धैवतः।

अग्नयेऽनीकवते प्रथमजानालभते मरुद्भ्यः सान्तपनेभ्यः सवात्यान् मरुद्भ्यो गृहमेधिभ्यो बष्किहान् मरुद्भ्यः क्रीडिभ्यः सꣳसृष्टान् मरुद्भ्यः स्वतवद्भ्योऽनुसृष्टान्॥१६॥

ऋषिः—प्रजापतिः। देवता—इन्द्राग्न्यादयः। छन्दः—भुरिग्गायत्री। स्वरः—षड्जः।

उक्ताः सञ्चराऽएताऽऐन्द्राग्नाः प्राशृङ्गा माहेन्द्रा बहुरूपा वैश्वकर्मणाः॥१७॥

ऋषिः—प्रजापतिः। देवता—पितरः। छन्दः—भुरिगतिजगती। स्वरः—निषादः।

धूम्रा बभ्रुनीकाशाः पितॄणाꣳसोमवतां बभ्रवो धूम्रनीकाशाः पितॄणां बर्हिषदां कृष्णा बभ्रुनीकाशाः पितॄणामग्निष्वात्तानां कृष्णाः पृषन्तस्त्रैयम्बकाः॥१८॥

ऋषिः—प्रजापतिः। देवता—वायुः। छन्दः—त्रिपाद्गायत्री। स्वरः—षड्जः।

उक्ताः सञ्चराऽएताः शुनासीरीयाः श्वेता वायव्याः श्वेताः सौर्याः॥१९॥

ऋषिः—प्रजापतिः। देवता—वसन्तादयः। छन्दः—विराड्जगती। स्वरः—निषादः।

वसन्ताय कपिञ्जलानालभते ग्रीष्माय कलविङ्कान् वर्षाभ्यस्तित्तिरीञ्छरदे वर्त्तिका हेमन्ताय ककराञ्छिशिराय विककरान्॥२०॥

ऋषिः—**प्रजापतिः**। देवता—**वरुणः**। छन्दः—**बृहती**। स्वरः—**मध्यमः**।

**समुद्राय शिशुमारानालभते पर्जन्याय मण्डूकानद्भ्यो**
**मत्स्यान् मित्राय कुलीपयान् वरुणाय नाक्रान्॥२१॥**

ऋषिः—**प्रजापतिः**। देवता—**सोमादयः**। छन्दः—**विराड्बृहती**। स्वरः—**मध्यमः**।

**सोमाय हꣳसानालभते वायवे बलाकाऽइन्द्राग्निभ्यां**
**क्रुञ्चान् मित्राय मद्गून् वरुणाय चक्रवाकान्॥२२॥**

ऋषिः—**प्रजापतिः**। देवता—**अग्न्यादयः**। छन्दः—**पङ्क्तिः**। स्वरः—**पञ्चमः**।

**अग्नये कुटरूनालभते वनस्पतिभ्यऽउलूकानग्नीषोमाभ्यां**
**चाषानश्विभ्यां मयूरान् मित्रावरुणाभ्यां कपोतान्॥२३॥**

ऋषिः—**प्रजापतिः**। देवता—**सोमादयः**। छन्दः—**भुरिक्पङ्क्तिः**। स्वरः—**निषादः**।

**सोमाय लबानालभते त्वष्ट्रे कौलीकान् गोषादीर्देवानां**
**पत्नीभ्यः कुलीका देवजामिभ्योऽग्नये गृहपतये पारुष्णान्॥२४॥**

ऋषिः—**प्रजापतिः**। देवता—**कालावयवाः**। छन्दः—**विराट्पङ्क्तिः**। स्वरः—**निषादः**।

**अह्ने पारावतानालभते रात्र्यै सीचापूरहोरात्रयोः सन्धिभ्यो**
**जतूर्मासेभ्यो दात्यौहान्त्संवत्सराय महतः सुपर्णान्॥२५॥**

ऋषिः—**प्रजापतिः**। देवता—**भूम्यादयः**। छन्दः—**भुरिगनुष्टुप्**। स्वरः—**गान्धारः**।

**भूम्याऽआखूनालभतेऽन्तरिक्षाय पाङ्क्त्रान् दिवे**
**कशान् दिग्भ्यो नकुलान् बभ्रुकानवान्तरदिशाभ्यः॥२६॥**

ऋषिः—**प्रजापतिः**। देवता—**वस्वादयः**। छन्दः—**निचृद्बृहती**। स्वरः—**मध्यमः**।

**वसुभ्यऽऋश्यानालभते रुद्रेभ्यो रुरूनादित्येभ्यो**
**न्यङ्कून् विश्वेभ्यो देवेभ्यः पृषतान्त्साध्येभ्यः कुलुङ्गान्॥२७॥**

ऋषिः—**प्रजापतिः**। देवता—**ईशानादयः**। छन्दः—**बृहती**। स्वरः—**मध्यमः**।

**ईशानाय परस्वतऽआलभते मित्राय गौरान्**
**वरुणाय महिषान् बृहस्पतये गवयाँस्त्वष्ट्रऽउष्ट्रान्॥२८॥**

ऋषिः—**प्रजापतिः**। देवता—**प्राजापत्यादयः**। छन्दः—**विराडनुष्टुप्**। स्वरः—**गान्धारः**।

**प्रजापतये पुरुषान् हस्तिनऽआलभते वाचे**
**प्लुषीँश्चक्षुषे मशकाञ्छ्रोत्राय भृङ्गाः॥२९॥**

ऋषिः—**प्रजापतिः**। देवता—**प्राजापत्यादयः**। छन्दः—**निचृदतिधृतिः**। स्वरः—**षड्जः**।

**प्रजापतये च वायवे च गोमृगो वरुणायारण्यो मेषो यमाय कृष्णो मनुष्यराजाय मर्कटः शार्दूलाय रोहिदृषभाय गवयी क्षिप्रश्येनाय वर्त्तिका नीलङ्गोः क्रिमिः समुद्राय शिशुमारो हिमवते हस्ती॥३०॥**

ऋषिः—**प्रजापतिः**। देवता—**प्राजापत्यादयः**। छन्दः—**स्वराट्त्रिष्टुप्**। स्वरः—**धैवतः**।

**मयुः प्राजापत्यऽउलो हलिक्ष्णो वृषदꣳशस्ते धात्रे दिशां कङ्को धुङ्क्षाग्नेयी कलविङ्को लोहिताहिः पुष्करसादस्ते त्वाष्ट्रा वाचे क्रुञ्चः॥३१॥**

ऋषिः—**प्रजापतिः**। देवता—**सोमादयः**। छन्दः—**भुरिग्जगती**। स्वरः—**निषादः**।

**सोमाय कुलुङ्गऽआरण्योऽजो नकुलः शका ते पौष्णाः क्रोष्टा मायोरिन्द्रस्य गौरमृगः पिद्वो न्यङ्कुः कक्कटस्तेऽनुमत्यै प्रतिश्रुत्कायै चक्रवाकः॥३२॥**

ऋषिः—**प्रजापतिः**। देवता—**मित्रादयः**। छन्दः—**भुरिग्जगती**। स्वरः—**निषादः**।

**सौरी बलाका शार्गः सृजयः शयाण्डकस्ते मैत्राः सरस्वत्यै शारिः पुरुषवाक् श्वाविद्भौमी शार्दूलो वृकः पृदाकुस्ते मन्यवे सरस्वते शुकः पुरुषवाक्॥३३॥**

ऋषिः—**प्रजापतिः**। देवता—**अग्न्यादयः**। छन्दः—**स्वराट्शक्करी**। स्वरः—**धैवतः**।

**सुपर्णः पार्जन्यऽआतिर्वाहसो दर्विदा ते वायवे बृहस्पतये वाचस्पतये पैङ्गराजोऽलजऽआन्तरिक्षः प्लवो मद्गुर्मत्स्यस्ते नदीपतये द्यावापृथिवीयः कूर्मः॥३४॥**

ऋषिः—**प्रजापतिः**। देवता—**चन्द्रादयः**। छन्दः—**निचृच्छक्करी**। स्वरः—**धैवतः**।

**पुरुषमृगश्चन्द्रमसो गोधा कालका दार्वाघाटस्ते वनस्पतीनां कृकवाकुः सावित्रो हꣳसो वातस्य नाक्रो मकरः कुलीपयस्तेऽकूपारस्य ह्रियै शल्यकः॥३५॥**

ऋषिः—**प्रजापतिः**। देवता—**अश्विन्यादयः**। छन्दः—**निचृज्जगती**। स्वरः—**निषादः**।

**एण्यह्नो मण्डूको मूषिका तित्तिरिस्ते सर्पाणां लोपाशऽआश्विनः कृष्णो रात्र्याऽऋक्षो जतूः सुषिलीका तऽइतरजनानां जहका वैष्णवी॥३६॥**

ऋषिः—**प्रजापतिः**। देवता—**अर्धमासादयः**। छन्दः—**भुरिग्जगती**। स्वरः—**निषादः**।

**अन्यवापोऽर्द्धमासानामृश्यो मयूरः सुपर्णस्ते गन्धर्वाणामपामुद्रो मासाङ्कश्यपो रोहित्कुण्डृणाची गोलत्तिका तेऽप्सरसां मृत्यवेऽसितः॥३७॥**

ऋषिः—**प्रजापतिः**। देवता—**वर्षादयः**। छन्दः—**स्वराड्जगती**। स्वरः—**निषादः**।

**वर्षाहूर्ऋतूनामाखुः कशो मान्थालस्ते पितॄणां बलायाजगरो वसूनां कपिञ्जलः कपोतऽउलूकः शशस्ते निर्ऋत्यै वरुणायारण्यो मेषः॥३८॥**

ऋषिः—**प्रजापतिः**। देवता—**आदित्यादयः**। छन्दः—**स्वराट्त्रिष्टुप्**। स्वरः—**धैवतः**।

**श्वित्रऽआदित्यानामुष्ट्रो घृणीवान्वार्ध्रीनसस्ते मत्याऽअरण्याय सृमरो रुरू रौद्रः क्वयिः कुटरुर्दात्यौहस्ते वाजिनां कामाय पिकः॥३९॥**

ऋषिः—**प्रजापतिः**। देवता—**विश्वेदेवादयः**। छन्दः—**शक्वरी**। स्वरः—**धैवतः**।

**खड्गो वैश्वदेवः श्वा कृष्णः कर्णो गर्दभस्तरक्षुस्ते रक्षसामिन्द्राय सूकरः सिꣳहो मारुतः कृकलासः पिप्पका शकुनिस्ते शरव्यायै विश्वेषां देवानां पृषतः॥४०॥**[१]

इति चतुर्विंशोऽध्यायः॥

१. इस अध्याय का भाष्य पण्डित हरिशरणजी नहीं कर पाये थे। अगले अध्याय के नवम मन्त्र तक भी उन्होंने भाष्य नहीं किया था, अतः इन मन्त्रों को मूलरूप में ही छापा गया है।

—जगदीश्वरानन्द सरस्वती